रुद्रस्यानुचरोभूत्वा सह तेनैव मोदते" या०। गीतज्ञोयदि-कथञ्चिद्योगेन परमम्पदन्न प्राप्नोति। तर्हि रुद्रस्य सचिवोभूत्वा तेनैव सह मोदते क्रीडति" मिता०। विवृतिर्गानशब्दे।

सुखं दुःखञ्च न प्रतिनियतविषयजन्यं व्यक्तिभेदेन कालभेदेन देशादिभेदेन च सुखहेतोरपि दुःखहेतुत्वं दुःखहेतोरपि सुखहेतुत्वम्। तथा हि खलादिं प्रति साधुभिरुक्तस्य विनयवाक्यस्यापि तं प्रति दुःखहेतुत्वं कथमन्यथा तस्य श्रवणात् खलादेरहितकर्म्मणि प्रवृत्तिः स्यात् एवं वैरिणं प्रत्यपि सामवादस्य दुःखहेतुत्वम् एतदाशयेनैव "सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः" इति माघे वर्णितम्। तथा चन्द्रकिरणनलिनभ्रमरध्वन्यादेरन्यत्र सुखकरस्यापि विरहिणं प्रति दुःखहेतुत्वम्,। एवंदुःखहेतोर्विष्ठाहारादेरपि शूकरं प्रति सुखकरत्वम् इति तत्र न वस्तुनियमः। अतएवोक्तम् "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया। हिमसेकविपत्तिरत्र मे नलिनी पूर्व्वनिदर्शनं गता" रघुः एवं कालभेदेऽपि सुखदुःखकरयोर्विपर्य्ययः यथा शीतकाले दुःखहेतोः ग्रीष्मे सुखहेतुत्वम् एवमग्न्यादितापस्य शीतकाले सुखकरस्य ग्रीष्मे दुःखकरत्वम् एवं देशभेदेऽपि यथा तिन्तिड्यादेरन्यत्र सेवने रोगादिदुःखदत्वं ज्वारदेशे तु सुखकरत्वम् अतएवोक्तं "किमाश्चर्य्यं ज्वारदेशे प्राणदा यमदूतिकेति" यथा च वस्तुमात्रस्य त्रिगुणात्मकत्वात् व्यक्तिभेदेन कालादिभेदेन च सत्त्वरजस्तमसां समुद्रेकात् विपर्य्यस्तरूपतापत्तिः तथा प्रागुक्तसांख्यतत्त्वकौमुदीवाक्ये स्पष्टैव। अत एव रसादौ लोकसिद्धकारणविपर्य्ययः" सा०द०उक्तः यथा "हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्। शोकहर्षादयो लोके जायन्तां नाम लौकिकाः। अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्। सुखं सञ्जायते तेभ्यः सर्व्वेभ्योऽपीति का क्षतिः। ये खलु रामवनवासादयो लोके दुःखकारणानि इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यत्वं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः। काव्ये पुनः "सर्व्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते" इति नियमान्न कश्चिद्दोषः। कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते। अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः"।

वैषयिकसुखेषु काव्यादिरसास्वादसुखमतीवचमत्काराधायकतया ब्रह्मानन्दतुल्यमित्यालङ्कारिका मन्यन्ते यथोक्तम्" सा०द०। "सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः। स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः। रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यते। इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनान्तरो धर्म्मः सत्वं तस्योद्रेकः रजस्तमसी अभिभूयाविर्भावः। अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशलक्षणचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्य्यायः"। "रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः"। "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिमिति"। यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति काल्पनिकं भेदमुररीकृत्य कर्म्मकर्त्तरि वा प्रयोगः। तदुक्तम्। "रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रस" इति च। "आनन्दजाश्रुभिरनुस्रियमाणमार्गान्" "स तमानन्दमविन्दत द्विज" इति च नैषधम् एवं तत्रत्यसर्व्वसर्गेषु उपान्तिमश्लोकेषु उदा०। "आनन्दाद्ध्येव प्रजाः प्रजायन्ते आनन्देन जीवन्ति आनन्दे प्रविलीयन्ते" इति श्रुतिः। ५विष्णौ। "आनन्दोनन्दनोनन्द" विष्णु स०। ६आदिगुरौ-त्रिकले दगणे ७षड्विंशैरगणै रचिते दण्डकच्छन्दोभेदे। आनन्दयति आ+नदि—णिच्—अच्। ८आनन्दकरे त्रि०। षष्टिसंवत्सरमध्ये अष्टाचत्वारिंशे ९वर्षभेदे पु०। "निष्पत्तिः सर्व्वशस्यानां सर्वशस्यमहार्घता। घृतं तैलं समं याति आनन्दे नन्दिनी प्रजा" ज्योति०तत्त्वलक्षणम्। १०मद्ये न०। ११गृहभेदे च तल्लक्ष्म गृहशब्दे वक्ष्यते। १२विष्णुगणभेदे पु०।

**आनन्दकानन** न० आनन्दहेतुः काननम्। अविमुक्ते काशीक्षेत्रे आनन्दवनादयोऽप्यत्र। तस्यानन्दवननामनिरुक्तिः काशीखण्डे २६ अ० दर्शिता यथा अविमुक्तं प्रकृत्य। "अस्यानन्दवनं नाम पुराऽकारि पिनाकिना। क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरम्। आनन्दकन्दबीजानामङ्कुराणि यतस्ततः। ज्ञेयानि सर्वलिङ्गानि तस्मि-